# Adityahridayastotram from padmapurANa

# આદિત્યહૃદયસ્તોત્રમ્ પદ્મપુરાણાન્તર્ગતમ્

## Document Information

Text title : AdityahRRidayapadmapurANAntargatam

File name : AdityahRRidayapadmapurANa.itx

Category : hRidaya, navagraha

Location : doc_z_misc_navagraha

Transliterated by : PP

Proofread by : PP

Description-comments : from Kalyan-Mandir magazine

Latest update : May 26, 2014

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 21, 2022

*sanskritdocuments.org*

Adityahridayastotram from padmapurANa

# આદિત્યહૃદયસ્તોત્રમ્ પદ્મપુરાણાન્તર્ગતમ્

॥ અથ શ્રીપદ્મપુરાણોક્ત નિરોગકારી આદિત્યહૃદયપ્રયોગઃ ॥

આદિત્યઃ પ્રથમં નામ દ્વિતીયં તુ દિવાકરઃ ।
તૃતીયં ભાસ્કરઃ પ્રોક્તં ચતુર્થં ચ પ્રભાકરઃ ॥

પઞ્ચમં ચ સહસ્રાંશુ ષષ્ઠં ચૈવ ત્રિલોચનઃ ।
સપ્તમં હરિદશ્વં ચ અષ્ટમં તુ અહર્પતિઃ ॥

નવમં દિનકરઃ પ્રોક્તં દશમં દ્વાદશાત્મકઃ ।
એકાદશં ત્રિમૂર્તિશ્ચ દ્વાદશં સૂર્ય એવ તુ ॥

॥ ફલશ્રુતિ ॥

દ્વાદશાદિત્યનામાનિ પ્રાતઃકાલે પઠેન્નરઃ ।
દુઃસ્વપ્નો નશ્યતે તસ્ય સર્વદુઃખં ચ નશ્યતિ ॥

દદ્રુકુષ્ટહરં ચૈવ દારિદ્યં હરતે ધ્રુવમ્ ।
સર્વતીર્થકરં ચૈવ સર્વકામફલપ્રદમ્ ॥

યઃ પઠેત્ પ્રાતરુત્થાય ભક્ત્યા સ્તોત્રમિદં નરઃ ।
સૌખ્યમાયુસ્તથારોગ્યં લભતે મોક્ષમેવ ચ ॥

॥ સૂર્યસ્ય દ્વાદશનામ નમસ્કારમ્ ॥

૧. ૐ આદિત્યાય નમઃ । ૨. ૐ દિવાકરાય નમઃ ।
૩. ૐ ભાસ્કરાય નમઃ । ૪. ૐ પ્રભાકરાય નમઃ ।
૫. ૐ સહસ્રાંશવે નમઃ । ૬. ૐ ત્રિલોચનાય નમઃ ।
૭. ૐ હરિદશ્વાય નમઃ । ૮. ૐ વિભાવસવે નમઃ ।
૯. ૐ દિનકરાય નમઃ । ૧૦. ૐ દ્વાદશાત્મકાય નમઃ ।
૧૧. ૐ ત્રિમૂર્તયે નમઃ । ૧૨. ૐ સૂર્યાય નમઃ ॥

॥ વિનિયોગઃ ॥

ૐ અસ્ય શ્રીઆદિત્યહૃદયસ્તોત્રમન્ત્રસ્ય શ્રીકૃષ્ણ ઋષિઃ,
અનુષ્ટુપ્છન્દઃ, શ્રીસૂર્યનારાયણો દેવતા, હરિતહયરથં દિવાકરં
ઘૃણિરિતિ બીજં, નમો ભગવતે જિતવૈશ્વાનર જાતવેદસે
નમઃ ઇતિ શક્તિઃ, અંશુમાનિતિ કીલકં, અગ્નિ કર્મ ઇતિ મન્ત્રઃ,
મમ સર્વરોગનિવારણાય શ્રીસૂર્યનારાયણપ્રીત્યર્થે જપે વિનિયોગઃ ।
॥ સ્તવઃ ॥

અર્કં તુ મૂર્ધ્નિ વિન્યસ્ય લલાટે તુ રવિં ન્યસેત્ ।
વિન્યસેત્ કરયોઃ સૂર્યં કર્ણયોશ્ચ દિવાકરમ્ ॥

નાસિકાયાં ન્યસેત્ ભાનું મુખે વૈ ભાસ્કરં ન્યસેત્ ।
પર્જન્યમોષ્ઠયોશ્ચૈવ તીક્ષ્ણં જિહ્વાન્તરે ન્યસેત્ ॥

સુવર્ણરેતસં કણ્ઠે સ્કન્ધયોસ્તિગ્મતેજસમ્ ।
બાહ્વોસ્તુ પૂષણં ચૈવ મિત્રં વૈ પૃષ્ઠતો ન્યસેત્ ॥

વરુણં દક્ષિણે હસ્તે ત્વષ્ટારં વામતઃ કરે ।
હસ્તાવુષ્ણકરઃ પાતુ હૃદયં પાતુ ભાનુમાન્ ॥

સ્તનભારં મહાતેજા આદિત્યમુદરે ન્યસેત્ ।
પૃષ્ઠે ત્વર્ઘમણં વિદ્યાદાદિત્યં નાભિમણ્ડલે ॥

કટ્યાં તુ વિન્યસેદ્ધંસં રુદ્રમૂર્વો વિન્યસેત્ ।
જાન્હોસ્તુ ગોપતિં ન્યસ્ય સવિતારં તુ જઙ્ઘયોઃ ॥

પાદયોસ્તુ વિવસ્વન્તં ગુલ્ફયોશ્ચ પ્રભાકરમ્ ।
સર્વાઙ્ગેષુ સહસ્રાંશુ દિગ્વિદિક્ષુ ભગં ન્યસેત્ ॥

બાહ્યતસ્તુ તમોધ્વંસં ભગમભ્યન્તરે ન્યસેત્ ।
એષ આદિત્યવિન્યાસો દેવાનામપિ દુર્લભઃ ॥

॥ ન્યાસમ્ ॥

મૂર્ધ્નિ અર્કાય નમઃ । લલાટે રવયે નમઃ ।
કરયોઃ સૂર્યાય નમઃ । કર્ણયોઃ દિવાકરાય નમઃ ।
નાસિકાયાં ભાનવે નમઃ । મુખે ભાસ્કરાય નમઃ ।
ઓષ્ઠયોઃ પર્જન્યાય નમઃ । જિહ્વાયાં તીક્ષ્ણાય નમઃ ।
કણ્ઠે સુવર્ણરેતસે નમઃ । સ્કન્ધયોઃ તિગ્મતેજસે નમઃ ।
બાહ્વોઃ પૂષણાય નમઃ । પૃષ્ઠે મિત્રાય નમઃ ।

દક્ષહસ્તે વરુણાય નમઃ । વામહસ્તે ત્વષ્ટારં નમઃ ।
હસ્તૌ ઉષ્ણકરાય નમઃ । હૃદયે ભાનુમતે નમઃ ।
સ્તનયોઃ મહાતેજસે નમઃ । ઉદરે આદિત્યાય નમઃ ।
પૃષ્ઠે અર્ધમણાય નમઃ । નાભૌ વિદ્યાદાદિત્યાય નમઃ ।
કટ્યાં હંસાય નમઃ । ઊર્વોઃ રુદ્રાય નમઃ ।
જાન્હોઃ ગોપતયે નમઃ । જઙ્ઘયોઃ સવિત્રે નમઃ ।
પાદયોઃ વિવસ્વતે નમઃ । ગુલ્ફયોઃ પ્રભાકરાય નમઃ ।
સર્વાઙ્ગે સહસ્રાંશવે નમઃ । દિગ્વિદિક્ષુ ભગાય નમઃ ।
બાહ્યે તમોધ્વંસાય નમઃ । અભ્યન્તરે ભગાય નમઃ ।

॥ ધ્યાનમ્ ॥
ભાસ્વદ્રત્નાઢ્યમૌલિઃ સ્ફુરદધરરુચારઞ્જિતશ્ચારુકેશો
ભાસ્વાન્ યો દિવ્યતેજાઃ કરકમલયુતઃ સ્વર્ણવર્ણઃ પ્રભાભિઃ ।
વિશ્વાકાશાવકાશો ગ્રહગ્રહણ સહિતો ભાતિ યશ્ચોદયાદ્રૌ
સર્વાનન્દપ્રદાતા હરિહરનમિતઃ પાતુ માં વિશ્વચક્ષુઃ ॥

॥ અર્ઘ્યમ્ ॥

એહિ સૂર્ય સહસ્રાંશો તેજોરાશિઃ જગત્પતે ।
અનુકમ્પય માં ભક્ત્યા ગૃહાણાર્ઘ્યં દિવાકર ॥

॥ મન્ત્રમ્ ॥

ૐ ઘૃણિઃ સૂર્ય આદિત્ય ।

॥ સૂર્યસ્તુતિઃ ॥

અગ્નિમીળે નમસ્તુભ્યમીષત્તૂર્યસ્વરૂપિણે ।
અગ્ન્યાયાહિ વીતયે ત્વં નમસ્તે જ્યોતિષાં પતે ॥

શન્નો દેવો નમસ્તુભ્યં જગચ્ચક્ષુર્નમોઽસ્તુ તે ।
ધવલામ્ભોરુહણં ડાકિનીં શ્યામલપ્રભામ્ ॥

વિશ્વદીપ નમસ્તુભ્યં નમસ્તે જગદાત્મને ।
પદ્માસનઃ પદ્મકરઃ પદ્મગર્ભસમદ્યુતિઃ ॥

સપ્તાશ્વરથસંયુક્તો દ્વિભુજો ભાસ્કરો રવિઃ ।
આદિત્યસ્ય નમસ્કારં યે કુર્વન્તિ દિને દિને ॥

જન્માન્તરસહસ્રેષુ દારિદ્ર્યં નોપજાયતે ।
નમો ધર્મવિપાકાય નમઃ સુકૃતસાક્ષિણે ॥

નમઃ પ્રત્યક્ષદેવાય ભાસ્કરાય નમો નમઃ ।
ઉદયગિરિમુપેતં ભાસ્કરં પદ્મહસ્તમ્ ।
સકલભુવનરત્નં રત્નરત્નાભિધેયમ્ ॥

તિમિરકરિમૃગેન્દ્રં બોધકં પદ્મિનીનામ્ ।
સુરવરમભિવન્દે સુન્દરં વિશ્વરૂપમ્ ॥

અન્યથા શરણં નાસ્તિ ત્વમેવ શરણં મમ ।
તસ્માત્ કારુણ્યભાવેન રક્ષસ્વ પરમેશ્વર ॥

॥ ઇતિ શ્રીપદ્મપુરાણે શ્રીકૃષ્ણાર્જુનેસંવાદે આદિત્યહૃદયસ્તોત્રમ્ ॥

Encoded and proofread by PP

---

*Adityahridayastotram from padmapurANa*

pdf was typeset on November 21, 2022

Please send corrections to *sanskrit@cheerful.com*